



श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# श्री सुन्दरकाण्डम् नवरत्न मन्त्रमाला

***shrI sundarakANDam navaratna mantramAlA***

# श्री सुन्दरकाण्डम् नवरत्न मन्त्रमाला

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः ।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ [1-1] - मानिक्यम् (ruby)

यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव ।
स्मृतिर्-मतिर्-धृतिर्-दाक्ष्यं स कर्मसु न सीदति ॥ [1-198] मुत्यम् (pearl)

अनिर्वेदः श्रीयो मूलं अनिर्वेदः परं सुखम् ।
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥ [12-10] - रक्ताङ्गी (coral)

नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यः नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥ [13-60] - मरगतम् (emerald)

प्रियान्न सम्भवेद्-दुःख अप्रियादधिकं भयम् ।
ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम् ॥ [26-50] - पुष्परागम् (topaz)

रामः कमलपत्राक्षः सर्व सत्त्वमनोहरः ।
रूपदाक्षिण्य सम्पन्नः प्रसूतो जनकात्मजे ॥ [35-8] - वज्रम् (diamond)

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ।
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्ट कर्मणः ॥ [42-33] - इन्द्रनीलम् (sapphire)

यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः ।
यदि वास्त्येकपत्नीत्वं शीतो भव हनूमतः ॥ [53-28] - गोमेदकम् (sardonyx)

निवृत्तवनवासं तं त्वया सार्धमरिन्दमम् ।
अभिषिक्तमयोध्यायां क्षिप्रं द्रक्षसि राघवम् ॥ [68-28] - वैडूर्यम् (cat's eye)